JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

# कालिदासमहाकवेः काव्येषु उपमालङ्कारप्रयोगाः

**Dr. V. MADHAVA REDDY**
Academic consultant
Department of Sanskrit
S.V.U College of arts
S.V. University, Tirupati

## प्रस्तावना

संस्कृतवाङ्ग्ये वेदानन्तरं काव्यानां महत्त्वं गरीयसी। संस्कृतसाहित्ये काव्यानि क्रमशः गद्य-पद्य-चम्पू-दृश्य-श्रव्याद्यनेकप्रकाराः विराजन्ते। साहित्यदर्पणकारस्य मतानुसारेण इन्द्रियग्राह्यत्वेन हेतुना काव्यं द्विधा विभक्तम्। तन्मते दृश्यकाव्यं श्रव्यकाव्यञ्च। साहित्यदर्पणे षष्ठपरिच्छेदे "दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्" इति श्रव्यकाव्यस्य श्रवणदृष्ट्या एव योग्यताऽस्ति। परन्तु दृश्यकाव्यस्य दर्शनदृष्ट्या श्रवणदृष्ट्या च योग्यता वरीवर्ति। महाकाव्यं, खण्डकाव्यं, चम्पूकाव्यादि भेदेन श्रव्यकाव्यम् त्रिविधं भवति। श्रव्यकाव्यं केवलं वाचिकविषयाधारितं भवति।

## महाकाव्यम्

सर्गैरवान्तरार्थवर्णनैरुपलक्षितो बन्धः रसवत्पद्यकदम्बविन्यासो महाकाव्यम्। साहित्यदर्पणकारेण विश्वनाथेन एवमुक्तम् –

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।**
**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।**
**एकवंशभवा भूपाः कुलजा बहवोऽपि वा।**
**शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।।**[1]

अर्थात् धीरोदात्तगुणयुक्तः कोऽपि देवपुरुषः देववंशसम्भूतो वा नायको भवेत्। एकवंशोत्पन्नाः कुलीनाः धीरोदात्तगुणयुक्ताः एको वा बहवः क्षत्रियाः नृपाः अपि नायकाः भवितुमर्हन्ति। श्रुङ्गारवीरशान्तेषु रसेषु कोऽपि एको रसः प्रधानरसः भवेत्। अन्ये अङ्गरसाः भवन्ति।

## अलङ्कारस्वरूपम्

शब्दार्थोभयगतत्वेन अलङ्कारविभागविषये भरतस्तावदाद्यत्वेन प्रस्तोतव्यः। यमकादयः पञ्चषाः प्रधानाः शब्दालङ्काराः, उपमादि अनेकालङ्काराः अर्थालङ्काराश्च भवन्ति। तत्र उपमायाः लक्षणं यथा – उप समीपे मानं प्रेक्षणं निमित्तान्तरैः उपमानम् इति अभिनवगुप्तस्याशयः। नाट्यशास्त्रकारादारभ्य अद्य यावत् सर्वैरप्यालङ्कारिकैः उपमा अङ्गीकृता। तेषु बहुभिः उपमायाः बह्वलङ्कारनिष्ठत्वमंगीकृतम्। अर्वाचीनालङ्कारिकेषु प्रमुखः अप्पय्यदीक्षितः उपमायाः अत्यधिकं प्राधान्यं कल्पयति यथा –

1. साहित्यदर्पणं – 6-325,326

**उपमा शैलूषी सम्प्राप्ता चित्रभूमिका भेदात्।**
**रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।**
**तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात्।**
**ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदेन सा।।**

एवं राजशेखरेणापि उपमायाः प्राशस्त्यमुक्तम्। वेदादारभ्य उपमायाः प्रभावं वयं द्रष्टुं शक्नुमः।

**"तुष्टेव वृक्षं वनिनो निवृश्चसि।"**[1]
**"यौरिव स्मयमानो नभोभिः।"**[2]

किन्तु भरतस्य नाट्यशास्त्रे एव अस्याः अलंकारत्वं दृश्यते। तेन उल्लिखितेषु चतुर्षु अलङ्कारेषु अन्यतमः अयमलङ्कारः। यथा –

**उपमा रूपकञ्चैव दीपकं यमकं तथा।**
**अलङ्कारास्तु विज्ञेयाश्चत्वारो नाट्यसंश्रयाः।।**[3]

भरतादनन्तरं भामहादिभिः बहुभिः आलङ्कारिकैः उपमा बहुविधभेदयुक्ता उक्ताऽऽसीत्। "उपमा यत्र सादृश्यलक्ष्मीरुल्लसतिद्वयोः हंसीव कीर्तिरिति" उपमालक्षणमुक्तम्। उपमानोपमेययोः साम्यमेव उपमा इत्यस्मिन् विषये न कस्याप्यभिप्रायभेदो विद्यते।

## कालिदासस्य परिचयः

संस्कृतसाहित्याकाशस्य लोकप्रियेषु महाकविषु महाकवेः कालिदासस्य स्थानं गरीयसी। महाकविरयं स्वप्रखरायाः प्रतिभायाः आलोके यस्य वस्तुनो वर्णनमकरोत् तदेव समेषां सहृदयानां समालोचकानाम् हृदयावर्जकमभूत्। महाकविरयं स्वकाव्येषु पशूनां, पक्षीणां, नदीनां, निर्झराणां, मनुष्याणां, देवानां च मनोज्ञं वर्णनमकरोत्। तस्य वर्णनेषु सर्वत्र सरसतायाः एव स्यन्दनं भवति। जन्मस्थलं केचन काश्मीरवासीति, केचन बंगावासीति, मिथिलावासीति कथयन्ति।

## कालिदासस्य कृतयः

कविरयं रघुवंशं, कुमारसम्भवम् इति महाकाव्ये द्वे, मेघदूतम्, ऋतुसंहारम् इति खण्डकाव्ये द्वे, अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं, मालविकाग्निमित्रम् इति नाटकत्रयं व्यरचयत्।

**पुराकवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।।**

1. ऋग्वेदः – 1/130/4
2. ऋग्वेदः – 2/4/6
3. नाट्यशास्त्रम् – 16/43

अयं कविः वैदर्भरीतिप्रयोगे समर्थः। स्वल्पसमासा स्वभावसरला च तस्य शैली सर्वानेव सद्य आकर्षयति इति तस्य कलापक्षापेक्षया हृदयपक्षस्य प्राधान्यं भजते। कालिदासस्य यथायात्तमभिवर्तमाना भाषा सर्वानानन्दयति।

## उपमा कालिदासस्य

यथा कटककुण्डलादयः स्त्रीणाम् आभूषणानीव सौन्दर्यवर्धकाः भवन्ति तथैव उपमाद्यलङ्काराः काव्यशरीरप्रकाशाय उपकुर्वन्ति। कालिदासमहाकवेः उपमालङ्कारप्रयोगकारणादेव काव्यजगति उपमायाः स्थानमद्वितीयमस्ति। आचार्य रुच्यकानामभिप्रायेण ज्ञायते यत् वैचित्र्यकारणादेव उपमालङ्कारः समस्तालङ्काराणां बीजमित्यामनन्ति।

कालिदासः भावुककविरासीत्। स्वहृदयस्थ भावोद्वेगानेव समस्त स्थावरजङ्गमात्मकजगति स्थापयामास। कालिदासस्य उपमा ब्रह्मसृष्टिमतिशेते इत्यत्र नास्ति संशयः। रघुवंशमहाकाव्ये हस्ते वरमालाधारिणी इन्दुमती पतिवरणेच्छया स्वयंवरे राज्ञाम्मध्ये “सञ्चारिणी दीपशिखा” इव राजगणमुखनि राजमार्गस्य भवनानीव उपमा अद्विितीया भवति।

यथा राजमार्गे सञ्चरणशीलायाः दीपशिखायाः सम्मुखे भवनानि प्रकाशन्ते, अग्रे गमनानान्तरं अन्धकारभावात् रात्रिरिव भासन्ते तथैव भवनस्थ राजानां मुखानि म्लानानि इति उपमा –

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावः स स भूमिपालः।।**[1]

अनेनैव वर्णनेन कालिदासः दीपशिखेति बिरुदमलञ्चकार।

रघुवंशे मङ्गलाचरणश्लोके अर्धनारीश्वररूपशिवपार्वत्यौ वागर्थसम्पृक्तस्वरूपत्वेन उपमालङ्कारः प्रयुक्तः –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वती परमेश्वरौ।।**[2]

ब्रह्मसरोवरात् निस्सरन्ती सरयूनदी सांख्यशास्त्रस्य अव्यक्तमूलप्रकृतितः समुत्पन्ना बुदितत्वसदृशी दृष्टिगताश्वासीत्। यथा –

**पयोधरैः पुण्यं जनाङ्गानां निर्विष्ट हेमाम्बुजरेणु यस्याः**
**ब्रह्म सरः कारणमाप्तवाचः बुद्धेरिवाव्यक्तमुदाहरन्ति।।**

रघुवंशमहाकाव्ये नन्दीनीं सेवमानः दिलीपमहाराजः यथा स्मृतिग्रन्थाः श्रुतीः अन्वगच्छन्ति तथा दिलीपमहाराजः नन्दिनीम् अनुसरतीति उपमायाः वैशिष्ट्यं द्योतते। यथा –

---

1. रघुवंशम् – 6-67
2. रघुवंशम् – 1.1

**तस्याः खुरन्यासपवित्रपां सुमपां सुलानां धुरिकीर्तनीया।**
**मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।**[1]

कालिदासः व्यञ्जनाकविरासीत्। असौ अत्यन्तविस्तृतभावानपि सङ्क्षिप्तरूपेण विरचयति स्म। यथा प्रकाशवत्याः शिखायाः दीपकः, त्रिमार्गात् त्रिदिवमार्गः, संस्कारवतीवाणीतः मनीषी विभूषन्ते तथा पार्वतीं पुत्रीरूपेण प्राप्य हिमालयः शोभते इत्युपमा गरीयसी –

**प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः।**
**संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च।।**[2]

अत्र दीपशिखाद्वारा पार्वयाः शारीरिकसंरचना तथा सौन्दर्यरूपं, संस्कारवत्या गिरया पार्वत्याः शुद्धता, त्रिमार्गद्वारा पार्वत्याः जगत्पावनत्वं प्रतीयमानमस्ति। अत्र पूर्णोपमालङ्कारः प्रयुक्तः। अलङ्कारसर्वस्वग्रन्थे रुय्यकः उपमालङ्कारदृष्टान्तत्वेन इदं श्लोकमगृह्णत्। कालिदासमहाकविः प्रकृतिकविः, प्रकृतौ स्थित प्रत्येकैकवस्तुं वर्णयामास यथा गङ्गाप्रवाहः, चन्द्रस्य शीतलत्वं, ज्योत्स्ना, नक्षत्राणां प्रकाशः, सूर्यतापः, गजानामुन्मादः, मृगस्य चञ्चलता, कमलानां सौन्दर्यं, आम्रमञ्जर्याः मादकगन्धः, कोकिलानां मधुरध्वनिः, मयूराणां नर्तनमित्यादयः सुष्टु वर्णिताः। कालिदासः अभिज्ञानशाकुन्तलनाटके शकुन्तलायाः शारीरिकसौन्दर्यं प्रकृतेराधिक्यतया वर्णयति। यथा –

**अनाघ्रातं पुष्पं किसलयमलूनं कररूहै-**
**रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।**
**अखण्डं पुण्यानां फलमिव च तदरूपमनघं**
**न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।।**[3]

निःसर्गसुन्दरी प्रकृतिकन्या शकुन्तला अनाघ्रातपुष्पम् इव करनखैः अलूनकिसलया इव अविद्धरत्नमिव, अनास्वादित नवमधुरसा इव अखण्डपुण्यरूपफलसदृशी आसीदिति वर्णयति।

सचेतनशकुन्तलयाः यौवनाङ्गानां साम्यं प्रकृतेः अचेतनलताभिः हृदयावर्जकरूपेण वर्णयामास। यथा –

**अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।**
**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।।**[4]

शकुन्तलायाः अधरं नवकिसलयमिव, भुजौ कृशशाखाविव, अङ्गेषु पुष्पसदृशं मनोहरयौवनसौन्दर्यमिति उपमा अतिविशिष्टाश्चासीत्।

---

1. रघुवंशम् – 1.1-2
2. कुमारसम्भवम् – 1-28
3. अभिज्ञानशाकुन्तलम् – 2-10
4. अभिज्ञानशाकुन्तलम् – 1.21

समाधिभूतस्य भगवान् शङ्करस्य वर्णनावसरे कविः उपमाद्वारा अपूर्वस्तब्धतायाः परिदृश्यमस्थापयत्। यथा –

**अवृष्टिसंरम्भमिवाम्बुवाहम् अपामिवाधारमनुत्तरङ्गम्।**
**अन्तश्चराणां मरुतां निरोधाद् निवातनिष्कम्पमिव प्रदीपम्।।**[1]

योगेश्वरः महादेवः स्वशरीरस्थसमस्तवायुं स्वस्मिन् व्यापृतं कृत्वा चञ्चलराहित्यमप्राप्नोत्। अत्र प्रकृतेः उपमात्रद्वारा कविः भगवतः गौरवमयीचित्रमुल्लिखति।

स्तनभारवशात् उन्नमितप्रातःकालसूर्यसदृशी रक्तवर्णवस्त्रधारी पार्वती पुष्पगुच्छभारवशात् उन्नमिता इव नवीनरक्तपल्लवैः मण्डितसञ्चारिणी लतासदृशं शोभतेति उपमा। यथा –

"पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव।"

विरहावस्थायां व्याकुलतां प्राप्य यक्षपत्नी कृष्णपक्षे पूर्वी क्षितिजस्योपरि चन्द्रकलासदृशी प्रतीयते। यथा –

**अधिक्षामां विहरशयने सन्निषण्णैकपार्श्वां।**
**प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।।**[2]

एवमेव राक्षसबन्धनात् मुक्ता ऊर्वशी किञ्चित् किञ्चित् चेतनत्वं प्राप्तवतीति कविः चन्द्रोदयानन्तरं यथा अन्धकारः निर्गच्छेत् तदा अन्धकाररहितरजिनी इव, वृष्ट्यां तडागेषु पतित्वा कलुषितां प्राप्य पुनः प्रसन्नसलिलतां प्राप्ता गङ्गा इव ऊर्वशी शोभतेति रसाभिव्यञ्जकः।

**आविर्भूते शशिनि तमसामुञ्चमानेव रात्रि-**
**र्नैं स्याचिर्हुतः इष छिन्नभूयिष्ठधूमा।**
**मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा**
**गङ्गा शोधः पतनकलुषा गृह्णतीव प्रसादम्।।**[3]

## उपसंहारः

समस्तवस्तुसदृश उपमानानामपि स्वनिजसौन्दर्यात्मकसम्बन्धं भवति। वास्तविकजीवने उपमायाः वैचित्र्यज्ञानमपेक्षते। कालिदासस्य उपमालङ्कारः सर्वदा श्लाघ्यनीय एव।

## आधारग्रन्थः


1. अभिज्ञानशाकुन्तलम् –चौखम्बाविद्याभवन्, वारणासी।
2. विक्रमोर्वशीयम् – कालिदासः – चौखम्बा विद्याभवन्, वारणासी।
3. कुमारसम्भवम् – कालिदासः, वाविल्लरामस्वामिशास्त्रुलु & सन्स्, मद्रास्।
4. रघुवंशम् – कालिदासः, वाविल्लरामस्वामिशास्त्रलु & सन्स्, मद्रास्।
5. मेघदूतम् – कालिदासः – श्रीकुप्पुस्वामिशास्त्री रीसेर्च, मद्रास्।


1. कुमारसम्भवम् – 3-47
2. मेघदूतम् – पूर्वमेघः - 26
3. विक्रमोर्वशीयम् – 1.9

6. नाट्यशास्त्रम् – भरतमुनिः – राधावल्लभत्रिपाठी, प्रतिभाप्रकाशन्, दिल्ली।
7. ऋग्वेदसंहिता – भाष्यकारः – सायणः, आनन्दाश्रममुद्रालयः, पूना।

EEE